# श्रीहरिनामाष्टकम्

{॥ श्रीहरिनामाष्टकम् ॥}

श्री गणेशाय नमः ॥

श्री केशवाच्युत मुकुन्द रथाङ्गपाणे
गोविन्द माधव जनार्दन दानवारे ।
नारायणामरपते त्रिजगन्निवास
जिह्वे जपेति सततं मधुराक्षराणि ॥ १॥

श्रीदेवदेव मधुसूदन शाङ्र्गपाणे
दामोदरार्णवनिकेतन कैटभारे ।
विश्वम्भराभरणभूषित भूमिपाल
जिह्वे जपेति सततं मधुराक्षराणि ॥ २॥

श्रीपद्मलोचन गदाधर पद्मनाभ
पद्मेश पद्मपद पावन पद्मपाणे ।
पीताम्बराम्बररुचे रुचिरावतार
जिह्वे जपेति सततं मधुराक्षराणि ॥ ३॥

श्रीकान्त कौस्तुभधरार्तिहराब्जपाणे
विष्णो त्रिविक्रम महीधर धर्मसेतो ।

वैकुण्ठवास वसुधाधिप वासुदेव

जिह्वे जपेति सततं मधुराक्षराणि ॥ ४॥

श्रीनारसिंह नरकान्तक कान्तमूर्ते

लक्ष्मीपते गरुडवाहन शेषशायिन् ।

केशिप्रणाशन सुकेश किरीटमौले

जिह्वे जपेति सततं मधुराक्षराणि ॥ ५॥

श्रीवत्सलाञ्छन सुरर्षभ शङ्खपाणे

कल्पान्तवारिधिविहार हरे मुरारे ।

यज्ञेश यज्ञमय यज्ञभुगादिदेव

जिह्वे जपेति सततं मधुराक्षराणि ॥ ६॥

श्रीराम रावणरिपो रघुवंशकेतो

सीतापते दशरथात्मज राजसिंह ।

सुग्रीवमित्र मृगवेधन चापपाणे

जिह्वे जपेति सततं मधुराक्षराणि ॥ ७॥

श्रीकृष्ण वृष्णिवर यादव राधिकेश

गोवर्धनोद्धरण कंसविनाश शौरे ।

गोपाल वेणुधर पाण्डुसुतैकबन्धो

जिह्वे जपेति सततं मधुराक्षराणि ॥ ८॥

इत्यष्टकं भगवतः सततं नरो यो

नामाङ्किकतं पठति नित्यमनन्यचेताः ।

विष्णोः परं पदमुपैति पुनर्न जातु

मातुः पयोधररसं पिबतीह सत्यम् ॥ ९॥

इति श्रीपरमहंसस्वामिब्रह्मानन्दविरचितं

श्रीहरिनामाष्टकं सम्पूर्णम् ॥

Encoded and proofread by Dinesh Agarwal

dinesh.garghouse at gmail.com, NA

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Hari Nama Ashtakam Lyrics in Devanagari PDF
% File name : harinAmAShTakam.itx
% Category : aShTaka
% Location : doc_vishhnu
% Author : Swami Brahmananda
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com
% Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, NA
% Latest update : July 19, 2012
% Send corrections to : Sanskrit@cheerful.com

% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website